# M.A. 1st Semester Examination, 2019

## SANSKRIT

PAPER – SAN-103

*Full Marks* : 40

*Time* : 2 hours

*The figures in the right hand margin indicate marks*

*Candidates are required to give their answers in their own words as far as practicable*

*Illustrate the answers wherever necessary*

सर्वे प्रश्नाः संस्कृतेन देवनागर्य्या च समाधेयाः

1. (*a*) प्रश्नत्रयं समाधेयम्— 2 × 3

(क) 'लण्सूत्रेऽकारश्च'—इत्यत्र लण्सूत्रे अकारस्य किं भवति ? कथं वा ?

(ख) को नाम प्रत्याहारः ?

(*ग*) 'उपदेशेऽजनुनासिक इत्' इति सूत्रे उपदेश-शब्दस्य कोऽर्थः ?

(*घ*) ऊकालोऽज्झ्रस्वदीर्घप्लुतः' इति सूत्रे 'ऊकालः' इत्यस्य कीदृशः समासः ?

(*ङ*) विवृतप्रयत्नः केषां वर्णानां भवति ?

(*b*) एकः प्रश्न समाधेयः— 2 × 1

(*क*) 'मिदचोऽन्त्यात्परः' इति सूत्रे 'अचः' इत्यत्र का विभक्तिः ? सूत्रस्यास्त्र कोऽर्थः ?

(*ख*) वर्णानां सदृशत्वं कतिविधम् ? कानि च तानि ?

(*ग*) नित्य-परयोर्मध्ये कः विधिः बलवान् ? कथं ज्ञायते ?

**2.** (*a*) प्रश्नत्रयं समाधेयम्— 4 × 3

(*क*) अन्योन्याश्रयदोषः कः ? तत्परिहारार्थं दीक्षितमहोदयेन ग्रन्थस्यादौ किं कृतम् ? सोदाहरणम् आलोच्यताम् ।

(*ख*) व्याख्यायताम्—प्रतिज्ञानुनासिक्याः पाणिनीयाः ।

(*ग*) 'लण्-सूत्रस्थावर्णेन सहोच्चार्यमाणो रेफो रलयोः संज्ञा ।'—सप्रसङ्गमालोच्यताम् ।

(घ) व्याख्यायताम्— मुखनासिकावचनोऽनुनासिकः ।

(ङ) 'नाज्झलौ' इति सूत्राशयः स्पष्टीक्रियताम् ।

(*b*) एक प्रश्नः समाधेयः— 4 × 1

(क) व्याख्यायताम् –'तस्मिन्निति निर्दिष्टे पूर्वस्य ।

(ख) अनिर्धारितसम्बन्धविशेषा षष्ठी स्थानेयोगा बोध्या— आलोच्यताम् ।

**3.** प्रश्नद्वयं समाधेयम्— 8 × 2

(क) 'तुल्यास्यप्रयत्नं सवर्णम्' इति सूत्रं सोदाहरणं व्याख्यायताम् ।

*अथवा*

तेन सपादसप्ताध्यायीं प्रति त्रिपाद्यसिद्धा । त्रिपाद्यामपि पूर्वं प्रति परं शास्त्रमसिद्धम्–आलोच्यताम् ।

(ख) यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयः— व्याख्यायताम् ।

*अथवा*

'आदेः परस्य', अनेकाल्शित्सर्वस्य' इति सूत्रद्वयं व्याख्येयम् ।